# Chandrakrita Shri Ganesha Stuti

# ચન્દ્રકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Chandrakrita Shri Ganesha Stuti

File name : gaNeshastutiHchandrakRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 61 | 1.61 41-56||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# ચન્દ્રકૃતા શ્રીગણેશસ્તુતિઃ

ચન્દ્ર ઉવાચ ।
નમામિ દેવં દ્વિરદાનનં તં યઃ સર્વવિઘ્નં હરતે જનાનામ્ ।
ધર્માર્થકામાઁસ્તનુતેઽખિલાનાં તસ્મૈ નમો વિઘ્નવિનાશનાય ॥ ૪૧॥

કૃપાનિધે બ્રહ્મમયાય દેવ ! વિશ્વાત્મને વિશ્વવિધાનદક્ષ ! ।
વિશ્વસ્ય બીજાય જગન્મયાય ત્રૈલોક્યસંહારકૃતે નમસ્તે ॥ ૪૨॥

ત્રયીમયાઽખિલબુદ્ધિદાત્રે બુદ્ધિપ્રદીપાય સુરાધિપાય ।
નિત્યાય સત્યાય ચ નિત્યબુદ્ધે ! નિત્યં નિરીહાય નમોઽસ્તુ નિત્યમ્ ॥ ૪૩॥

અજ્ઞાનદોષેણ કૃતોઽપરાધસ્તં ક્ષન્તુમર્હોઽસિ દયાકર ! ત્વમ્ ।
તવાપિ દોષઃ શરણાગતસ્ય ત્યાગે મહાત્મન્ ! કુરુ મેઽનુકમ્પામ્ ॥ ૪૪॥

બ્રહ્મોવાચ ।
ઇતિ તદ્વચનં શ્રુત્વા સુપ્રસન્નો ગજાનનઃ ।
તસ્મૈ વરાન્ દદૌ દેવઃ સ્તુત્યા નત્યા સુતોષિતઃ ॥ ૪૫॥

યથાપૂર્વં સ્થિતં રૂપં તથા તત્ તે ભવિષ્યતિ ।
ભાદ્રશુક્લચતુર્થ્યાં ત્વાં યો નરઃ સમ્પ્રપશ્યતિ ॥ ૪૬॥

તસ્યાભિશાપો નૂનં સ્યાત્ પાપં હાનિશ્ચ મૂર્ખતા ।
તસ્યામદર્શનીયોઽસિ યદુક્તં મે સુરૈઃ સહ ॥ ૪૭॥

કૃષ્ણપક્ષે ચતુર્થ્યાં તુ વ્રતં યત્ ક્રિયતે નરૈઃ ।
તવોદયેઽહં પૂજ્યસ્ત્વં પૂજનીયઃ પ્રયત્નતઃ ॥ ૪૮॥

દર્શનીયઃ પ્રયત્નેન વિપરીતે વ્રતં વૃથા ।
લલાટે કલયા તિષ્ઠ મમ પ્રીતિકરઃ શશિન્ ॥ ૪૯॥

પ્રતિમાસં દ્વિદ્વતીયાયાં નમસ્યશ્ચ ભવિષ્યસિ ।
એવં લબ્ધવરશ્ચન્દ્રો યથાપૂર્વોઽભવત્ તદા ॥ ૫૦॥

ઇતિ ચન્દ્રકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૬૧ । ૧.૬૧ ૪૧-૫૬ ॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 61 . 1.61 41-56..

Proofread by Preeti Bhandare

*Chandrakrita Shri Ganesha Stuti*

pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*